# सुन्दरकाण्ड एकविंशः सर्गः (२१) - ॥ रावणतृणीकरणम् ॥

तस्य तद् वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ।
आर्ता दीनस्वरा दीनं प्रत्युवाच शनैर्वचः ॥ १ ॥

दुःखार्ता रुदती सीता वेपमाना तपस्विनी ।
चिन्तयन्ती वरारोहा पतिमेव पतिव्रता ॥ २ ॥

तृणमन्तरतः कृत्वा प्रत्युवाच शुचिस्मिता ।
निवर्तय मनो मत्तः स्वजने क्रियतां मनः ॥ ३ ॥

न मां प्रार्थयितुं युक्तं सुसिद्धिमिव पापकृत् ।
अकार्यं न मया कार्य मेक पत्न्या विगर्हितम् ॥ ४ ॥

कुलं सम्प्राप्तया पुण्यं कुले महति जातया ।
एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥ ५ ॥

राक्षसं पृष्ठतः कृत्वा भूयो वचन मब्रवीत् ।
नाह मौपयिकी भार्या परभार्या सती तव ॥ ६ ॥

साधु धर्म मवेक्षस्व साधु साधु व्रतं चर ।
यथा तव तथाऽ न्येषां दारा रक्ष्या निशाचर ॥ ७ ॥

आत्मान मुपमां कृत्वा स्वेषु दारेषु रम्यताम् ।
अतुष्टं स्वेषु दारेषु चपलं चलितेन्द्रियम् ॥ ८ ॥

नयन्ति निकृति प्रज्ञं परदाराः पराभवम् ।
इह सन्तो न वा सन्ति सतो वा नानुवर्तसे ॥ ९ ॥

तथा हि विपरीता ते बुद्धि राचार वर्जिता ।
वचो मिथ्या प्रणीतात्मा पथ्यमुक्तं विचक्षणैः ॥ १० ॥

राक्षसाना मभावाय त्वं वा न व्रतिपद्यसे ।
अकृतात्मान मासाद्य राजान मनये रतम् ॥ ११ ॥

समृद्धानि विनश्यन्ति राष्ट्राणि नगराणि च ।
तथेयं त्वां समासाद्य लङ्का रत्नौघ सङ्कुला ॥ १२ ॥

अपराधात् तवैकस्य न चिराद् विनशिष्यति ।
स्वकृतैर् हन्य मानस्य रावणा दीर्घदर्शिनः ॥ १३ ॥

अभिनन्दन्ति भूतानि विनाशे पाप कर्मणः ।
एवं त्वां पाप कर्माणं वक्ष्यन्ति निकृता जनाः ॥ १४ ॥

दिष्ट्यैतद् व्यसनं प्राप्तो रौद्र इत्येव हर्षिताः ।
शक्या लोभयितुं नाह मैश्वर्येण धनेन वा ॥ १५ ॥

अनन्या राघवेणाहं भास्करेण प्रभा यथा ।
उपधाय भुजं तस्य लोकनाथस्य सत्कृतम् ॥ १६ ॥

कथं नामोप धास्यामि भुज मन्यस्य कस्यचित् ।
अह मौपयीकी भार्या तस्यैव वसुधापतेः ॥ १७ ॥

व्रत स्नातस्य धीरस्य विद्येव विदितात्मनः ।
साधु रावण रामेण मां समानय दुःखिताम् ॥ १८ ॥

वने वासितया सार्थं करेण्वेव गजाधिपम् ।
मित्र मौपयिकं कर्तुं रामः स्थानं परीप्सता ॥ १९ ॥

वधं चानिच्छता घोरं त्वयाऽसौ पुरुषर्षभः ।
विदितः स हि धर्मज्ञः शरणागत वत्सलः ॥ २० ॥

तेन मैत्री भवतु ते यदि जीवितु मिच्छसि ।
प्रसादयस्व त्वं चैनं शरणागत वत्सलम् ॥ २१ ॥

मां चास्मै प्रयतो भूत्वा निर्यातयितु मर्हसि ।
एवं हि ते भवेत् स्वस्ति सम्प्रदाय रघूत्तमे ॥ २२ ॥

अन्यथा त्वं हि कुर्वाणो वधं प्राप्स्यसि रावण ।
वर्जयेद् वज्र मुत्सृष्टं वर्जये दन्तकश् चिरम् ॥ २३ ॥

त्वद्विधं तु न सङ्क्रुद्धो लोकनाथः स राघवः ।
रामस्य धनुषः शब्दं श्रोष्यसि त्वं महास्वनम् ॥ २४ ॥

शतक्रतु विसृष्टस्य निर्घोष मशनेरिव ।
इह शीघ्रं सुपर्वाणो ज्वलितास्या इवोरगाः ॥ २५ ॥

इषवो निपतिष्यन्ति राम लक्ष्मण लक्षणाः ।
रक्षांसि परिनिघ्नन्तः पुर्या मस्यां समन्ततः ॥ २६ ॥

असम्पातं करिष्यन्ति पतन्तः कङ्क वाससः ।
राक्षसेन्द्र महासर्पान् स राम गरुडो महान् ॥ २७ ॥

उद्धरिष्यति वेगेन वैनतेय इवोरगान् ।
अपनेष्यति मां भर्ता त्वत्तः शीघ्र मरिन्दमः ॥ २८ ॥

असुरेभ्यः श्रियं दीप्तां विष्णु स्त्रिभिरिव क्रमैः ।
जनस्थाने हतस्थाने निहते रक्षसां बले ॥ २९ ॥

अशक्तेन त्वया रक्षः कृत मेत दसाधु वै ।
आश्रमं तु तयोः शून्यं प्रविश्य नरसिंहयोः ॥ ३० ॥

गोचरं गतयोर्भ्रात्रोरपनीता त्वयाधम ।
न हि गन्धमुपाघ्राय राम लक्ष्मण योस्त्वया ॥ ३१ ॥

शक्यं सन्दर्शने स्थातुं शुना शार्दूलयो रिव ।
तस्य ते विग्रहे ताभ्यां युगग्रहण मस्थिरम् ॥ ३२ ॥

वृत्रस् येवेन्द्र बाहुभ्यां बाहो रेकस्य निग्रहः ।
क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह ।
तोयमल्प मिवादित्यः प्राणा नादास्यते शरैः ॥ ३३ ॥

गिरिं कुबेरस्य गतोपधाय वा
सभां गतो वा वरुणस्य राज्ञः ।
असंशयं दाशरथेर्न मोक्ष्यसे
महाद्रुमः कालहतोऽशनेरिव ॥ ३४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकविंशः सर्गः ॥ २१ ॥